# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| कक्षा – शास्त्री-3 (OLD) | प्रश्नपत्रम् – 6 | गुणाः – ५० |
| विषयः – वेदः | सत्रम् – 6 | समयः – १० तः १२ |
| दिनाङ्कः – १९/०७/२०२१ | सन्दर्भग्रन्थः – वेदभाष्यभूमिकासङ्ग्रहः | |

**सूचना - निम्नलिखितेषु दशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः ।**
**प्रत्येकं प्रश्नस्य समानगुणाः । (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः ससन्दर्भं व्याख्या कार्या ।**

१ हेतुर्निर्वचनं निन्दा प्रशंसा संशयो विधिः ।
परकृतिः पुराकल्पो व्यवधारणकल्पना ॥

२ स्तोभनात प्रदिश्यन्ते नागीतित्वेन वर्णवत् ।
स्वरादिवत् प्रदिश्यन्ते गीतिकालोपयोगतः ॥

३ प्राप्ते कर्मणि नानेको विधातुं शक्यते गुणः ।
अप्राप्ते तु विधीयेरन् बह्वोऽप्येकयत्नतः ॥

**प्रश्नः २ मन्त्रस्य लक्षणं यथाग्रन्थं विवेच्यताम् ।**

**प्रश्नः ३ ग्रन्थोक्तदिशानुसारं त्रैशोकसामोहनविचारः प्रतिपाद्यताम् ।**

**प्रश्नः ४ कयोरपि द्वयोः ससन्दर्भं व्याख्या कार्या ।**

१ यजुर्वेदस्थमाधानं तदङ्ग साम तत्र किम् ।
उच्चैरुपांशु वा गानमुच्चैः शीघ्रप्रतीतितः ॥

२ किं सर्वपृष्ठे सर्वाणि पृष्ठदेशे यथोक्ति वा ।
पृष्ठशब्दात् पृष्ठदेशे वचनात् तु व्यवस्थितिः ॥

३ ब्राह्मणेनापि तद्गानान् मन्त्राः पुण्यैकहेतवः ।
न तद्गानस्य दृष्टत्वात् दृष्टं वरमदृष्टतः ॥

**प्रश्नः ५ ग्रन्थोक्तदिशानुसारं एकविंशादिस्तोत्रविचारः प्रस्तूयताम् ।**

**प्रश्नः ६ संशवादे पृष्ठत्वनिर्णयः यथाग्रन्थं प्रस्तूयताम् ।**

**प्रश्नः ७ कयोरपि द्वयोः ससन्दर्भं व्याख्या कार्या ।**

१ यस्तत्राथर्वणान् मन्त्रान् जपेच्छ्रद्धासमन्वितः ।
तेषाम् अर्थोद्भवं कृत्स्नं फलं प्राप्नोति स ध्रुवम् ॥

२ सिद्धसाध्यस्वभावाभ्यां धात्वर्थो द्विविधो मतः ।
अन्योत्पादानुकूलात्मा भावना साध्यरूपिणि ॥

३ अमावास्या पौर्णमासी पुण्यनक्षत्रयुक् तिथिः ।
अत एव त्रयः कालाः सर्वेषां कर्मणां स्मृताः ॥

**प्रश्नः ८ भावनायाः सामान्यलक्षणनिरूपणं क्रियताम् ।**

**प्रश्नः ९ राज्याभिषेकोपयुक्ता अनुष्ठानविधयः यथाग्रन्थं विवेच्यताम् ।**

**प्रश्नः १० अधोलिखितेषु दशानां लघूत्तराणि लिखत ।**

१ अस्य ग्रन्थस्य भाष्याचार्यः कः ?

२ 'समुच्चेया विकल्प्या वा.......' पूर्तिः विधेया ।

३ ऊहग्रन्थोऽपौरुषेयः वा पौरुषेयः ?

४ पवमाने कति सूक्तानि सन्ति ?

५ _______ विधातुं शक्यते गुणः इति पूरयत ।

६ 'विश्वजित् सर्वपृष्ठौ भवति' इति कुत्र श्रूयते ?

७ पृष्ठानि कति सन्ति ?

८ 'किं सर्वपृष्ठे ______ यथोक्ति वा' इति पूरयत ।

९ 'खादिरो यूपो भवति' इति कुत्र श्रूयते ?

१० 'तस्मादृच्यध्यूढं साम गीयते' इति कस्य उपनिषदः उक्तिः ?

११ 'यस्य निःश्वसितं वेदा ______ जगत्' पूरयत ।

१२ 'सामवेद आदित्यात्' इति कस्य ब्राह्मणग्रन्थस्योक्तिः ?

१३ अथर्ववेदस्य ऋत्विक् कः ?

१४ अथर्ववेदस्य अपरं नाम किम् ?

१५ धात्वर्थो कतिविधः ?

****